Pen & Prosperity
Website: https://penandprosperity.vgcet.com
Volume 3 :: Issue 3 :: June 2026 :: e-ISSN- 3048-9555 :: DOI Link : https://doi.org/10.70798/PP/030300005

# वेदे नारीणां स्थानम्

***Sutrisha Chakraborty Nanda***
Research Scholar, Department of Sanskrit, YBN University, Namkum, Jharkhand, India
***Dr. Renu Singha***
Associate Professor, Department of Sanskrit, YBN University, Namkum, Jharkhand, India, Email: trinavasusnata@gmail.com

**अमूर्तम् (Abstract):** *स्त्री तथा नारी-शव्दं एकं प्राचीना शव्दम्। नारी-शव्दं एकं ततसमशव्दम्।संस्कृतभाषात् अस्याः आगमनम्। नारीशव्दस्य वुतपत्तिः-नृ\नर् धातोःईन् प्रत्यये स्त्रीलिङ्गवाचकं ई प्रत्ययं युक्तं कृत्वा नारी इति पदं निष्पन्नमभवत्।नरः पदस्य अर्थः मानवः तस्य स्त्रीलिङ्गे नारी भवति।नारी इति पदस्य अर्थः मानवी प्राचीन इन्दो-इउरोपीयभाषायां अस्याः मूल अर्थासीत् मानवः वलवान् व्यक्तिः। उणादि सूत्रानुसारे कतिपयवैयाकरणाणां मतानुसारेण नरः धातोःअर्थः चलयति प्रेरयति। नरः धातोःस्त्रीलिङ्गे नारी पदं सिद्धमभवत्। प्राचीनसंस्कृतसाहित्ये धर्मशास्त्रे अस्याः उपयोगं दृश्यते-*

ARTICLEINFO
*Article history:*
**Received:** 30 May 2026
**Received** in revised form 10 June 2026
**Accepted** 15 June 2026
**Citation: Chakraborty Nanda. S. & Singha. R.,** (2026) "वेदे नारीणां स्थानम्", *Pen and Prosperity*, Vol. 3, Issue. 3, June 2026.

***"यत्रनार्यस्यु पूज्यन्ते रमस्ते तत्र देवताः" मनुस्मृतिः ३/५६***

*प्राचीनभारतीय तथा आधुनिकभारतीय समाजे नारीणां स्थानं युगे युगान्तरे चिरायतरूपे प्रतिपन्नं भवति।पितृतान्तिकसमाजे युगे युगे शास्त्रीयाचारानि नारीशक्तिं प्रतिहतकर्त्तुं सर्वदा प्रभावशालीरूपे दृश्यते। शास्त्रीयाचारानानुसारे नारीणां आदर्शभावमूर्त्ति अभवत् पतिव्रतास्त्रीरूपे पुत्रस्य जननीरूपेआदर्शपुत्रवधूरूपे।न तु स्वाधीनव्यक्तित्वमयीसा-फल्यमण्डितनारीरूपे। पितृतान्तिकपुरुषकेन्दिकसमाजे धर्मीयानुशासनेन एकदा पुरुषाणां प्रभूत्व च नारीणां मूलात् अवदमनस्य यः इतिहास प्राचीनकालात्उद्भूतमभवत् सः अद्यावधि निरवच्छिन्नं चलति। उनविंशशतकस्य नवजागरनस्य च धर्मसंस्कारकालात् नारीणां प्रगति चलति, तथापि धर्मीयशृङ्खलात् तासां मुक्तिं अद्यापि न भवति। समग्रभारतभूखण्डे नारीणां संख्या अत्याधिका, तु संसारस्य क्षुद्रसीमानायाः वहिः व्यक्तीत्वमयीनारीणां संख्या अत्युल्पा। अद्यापि धर्मीय ऐतिह्यं च संस्कृतेः प्रभावात् अधिकनारी शिक्षात् व़ञ्चिता भूत्वा संसारस्य क्षुद्रसीमायामावद्धं भवति। अतः फलस्वरुप नारीशक्तिविकाशस्य पन्थारुद्धमभवत् च देशस्य सर्वाङ्गिनविकाशस्य पन्था अपि रुद्धमभवत्। वर्तमाने भारतीयसंविधाने नारीणां हिताय विचारव्यवस्था प्रयुक्तं भवति, तथापि प्राचीनाधर्मीयानुशासनरुपप्रतिवन्धकता नारीणां अधिकारे विघ्नमकरोत्।अपरपक्षे नारी स्वयं धर्मीयानुशासनस्य वन्धनात् मुक्तं न अशक्नोत्।इदं निश्चयं कृत्वा वक्तुं शक्यते यत् धर्मीयविधानस्य युक्तिहीनानुशासनम् नारीप्रगतेः मूलप्रतिवन्धकम्। प्राचीनयुगात् आधुनिक तथा वर्तमानयुगपर्यन्तम् मानवसमाजः प्रधानतपुरुशप्रधानः।पृथिव्यां ज्ञानविज्ञानस्य अभूतपूर्वप्रसारं च देशे आर्थिकोन्नति अभवत् तत् सत्त्वेपि नारीणां उन्नतिं स्वल्पं भवति।अद्य नारी सर्वक्षेत्रेपि तस्याः प्रतिभायाः प्रभावं अर्पूवरूपेन प्रदर्शयति। नारी ज्ञानविज्ञाने शिक्षायां प्रयुक्तिविद्यायां पुरुषस्य समकक्षम्, इति प्रमाणितसत्यम्। तथापि केवलं यथोपयुक्तमानुकुलपरिवेशंविना नारीणां आत्मशक्तिविकाशस्य पन्थाःनिरूद्धं भूत्वा स्तव्धं तिष्ठति।*


Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026

**कूटशव्दाः-(Keyword)**: *व्रह्मवादिनी, नारीऋषिका, शिक्षाज्योतिप्रकाशेन, काषिकाभाष्ये अम्भृणऋषेःदुहिता वाक्, यज्ञपवीतम्, विदुषिकन्या लोपामुद्रा, गार्गी अपाला, मैत्रेयी, नारीऋषिशश्वती,*

**मुखवन्धः (Introduction):** वेदेनारीणां स्थानम्- नृ, नर शव्दस्य भीष् प्रत्यययोगे नारीशव्दस्य उतपत्तिः भवति, अर्थः। तस्मात् वैदिकयुगात् प्रगतिशीलवर्तमानाधुनिकयुगेपि नारी प्राणशक्तिः, नार्यः प्रवाहितसमाजस्य दर्पणस्य प्रतिविम्वास्वरूपाः, स्त्रियः जीवनस्य आधाराः सन्ति। वृहदारन्यकोपनिषदि अस्ति सृष्टिकर्ताविराटपुरुषस्य नवसृष्टिवैचित्रस्यस्वेच्छया स्त्रियसत्त्वायाःउत्पत्तिः अभवत्। "आत्मवेद असिदेक एव सोऽकामायत जाया मे स्यात्"।सृष्टेः प्राक् आत्मा एव केवलं आसीत्, परव्रह्मः ऐच्छत् तस्य जाया भवतु – इयं औपनिषदिकः वाणी नारीणां महिमाविषये तथ्यं प्रकाश्यन्ते।पुराणे अस्ति देवाणां शक्तौ शक्तिमती परमव्रह्ममयीमातादुर्गा असुरदलनीमहिषासुरमर्द्दिनीरूपे पृथिव्यामवतीर्णमभवत्। प्राचीनयुगात् वर्तमानयुगेपि पुरुषनियन्त्रितसमाजस्य अवदमने अत्याचारीता नारी कदापि अभवत् लाञ्छिता कदापि अभवत् सम्मानहीना।

विविधा कथायां लोककथासु नारी कदापि मुख्यचरित्रा कदापि प्रणयिणी कदापि गौणचरित्रा, कदापि गृहकत्री, कदापि च वारवणिता। नवनवरूपे सा शतरूपा। अस्य समाजदर्पनस्य सन्दर्भे वैदिकयुगस्य नारीणां स्थानं किदृश वा आसन् इति प्रश्न परीपृच्छते पुणःपुणः।इति कौतुहलात् मम अस्याः रचनायाःसूत्रपातमभवत्

ऋग्वेदः वैदिकसाहितस्य प्रथमग्रन्थः, अस्मिन् ग्रन्थे नारीणां स्थानविषये प्रतक्ष्य कापि उक्तिः नास्ति, तथापि विविधवर्णनाउपमामूलकः उक्तेःवैदिकसमाजे नारीणां स्थानस्य चित्रं परिस्फुटितं करोति। मत्राणि मिलित्वा सूक्तमेकं सूक्ताणि मिलित्वा अनुवाक्, अतः अनुवाक् मिलित्वा मण्डलम् अभवत्, अतः अयं वैदिकसाहित्यविभागाः अध्ययनेन अस्य प्रश्नस्योत्तरं आप्नुवन्ति जनाः। ऋग्वेदस्य रचनायाः कति स्तराः सन्ति। तस्य प्रथमस्तरे नारीस्वाधीनचारिनी। देवी ऊषा कस्मिन् अपि मन्त्रे सूर्यदेवस्य वधूः कुत्रापि माता, कुत्रापि कन्या कुत्रापि उच्यते ऊषा स्मितहासिनी। नववधूः यद्रुपं पत्युः समीपे सस्व अस्तित्वं प्रकाशितं करोति तद्रुपं ऊषा प्रत्यहं नवप्रातःप्रकाशितं करोति। कदापि उच्यते ऊषा निर्लज्जा नारी ऋग्वेद १/४६/४

अस्मिन् युगे दृश्यते नारी स्वयं तस्याः पति निर्वाचनं अकरोत्।"स्वयं सा मित्रं वनुते जनोचित्"।अवैधप्रणयं अपि अस्मिन् युगे आसीत्। यम यमी सूक्ते भ्राता भगिनी, नभोनेदिष्ट सूक्ते१०/६१/५-७पिता कन्यायाः आसक्तेःवार्तायाः उल्लेखं अस्ति अद्य प्रचलितसमाजे यः घृण्यरूपे विवेचितम्। स्त्रीहरणस्य कथायाः उल्लेखं अपि अस्ति ऋग्वेदे। पुरुमित्रस्य कन्यां जहार विमदः ऋग्वेदे१/११२/७, विवाहे कन्यापनसूचकरूपोक्तेः उल्लेखं अपि दृश्यते

पुरुषस्य वहुपत्निग्रहनस्य कथापि कदापि मुख्य कदापि गौँणरूपे दृश्यते ऋग्वेद ७/२६/३ स्वपत्नीविनाशाय प्रयुक्तमन्त्रेण प्रतिपन्नमभवत्सर्वप्रथमं सहमरणस्य कथा शृणोमि अथर्ववेदे अथर्ववेद१८/३/३। दुहितायाःवपुषः यदि त्रुटिपूर्णम् भवति तर्हि विवाहे वरपणप्रयोजनस्य विषयमुल्लिखितोऽभवत् वेदे असकृत्।

नारी पुरुषस्य अर्द्धाङ्गिनी इति वाचा मनःउतसाहदीप्तं भवति।अपत्यं तु अति प्रयोजनीयम्।उत्तरवैदिकयुगे नार्यः वहुपतीत्वत्व अपि स्वृकीतमासीत् वेदे, तु स्वल्पदिवसगते तस्य अयं अधिकारः नासीत्"पुंसो वह्व्यो जाया भवन्ति"शतपथव्राह्मणः९/४/१/६

एकपुरुषस्य वहुपत्नी आसीत्। परवर्त्तीसमये नार्य़ः तु वहुपतीग्रहणस्य अधिकारःसमाजे नासीत्।विवाहस्य मन्त्रोच्चारनेन इति उच्यते यत् स्त्री भवतु स्वामी अनुवर्तीनि

पति भवतु वध्वः अनुवर्ती इति वाक्यं कुत्रापि न दृश्यते। कुत्रापि दृश्यते म़ञ्जुला वधूः तस्याः पतिप्रेमं लिप्सते सा, शतपथव्राह्मणम्१३/१/९/६सौन्दर्यं तु न चिरं स्थास्यति, तदा पतिप्रेम शिथिलं भविष्यति। पति तदा वहुपत्निग्रहणं करिष्यति। अतः अस्मात् भयाय् सपत्नीविनाशाय मन्त्रः अस्ति। ऋग्वेदे अथर्ववेदे मन्त्रोऽयं सपत्नीविनाशकमन्त्रः इति आख्यातःभवति।

नार्यः स्थानम् अन्तपुरे अपसृतमभवत्, यद्यपि ऋग्वेदे योद्धानार्यस्योल्लेखं अस्ति मुदगलिन्यः, विशपलायाः, वध्रीमतेः शशीयस्यः नाम अपि लभ्यते, यासां कापि समरे आहता कापि युद्धे विजयिनी आसीत्।कदापि नार्यविषये विरूपोक्तिः श्रुयते – "न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता" ऋग्वेदः१0/९५/१५, उर्वश्यः उक्तिरियं महाराजपुरूरवां प्रति।किन्तु


**Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026**

ऋग्वेदे कुत्रापि सतीदाह सहमरणप्रथायाः वा उल्लेखं नास्ति -इदं मनोहरं विषयम्। कुमारीकन्यायाः कथा असकृत् अस्ति, कन्यानां अमाजु अमाजुरा इति उच्यते,

विवाहरहिताकन्या पित्रालये अतिष्ठत् पैत्रिकसम्पत्तिः लिप्सते स्म। वैदिकसमाजे सर्वश्रेण्यां नार्यः शिक्षा प्रचलितं नासीत्, तु उच्चश्रेण्याः आर्यगणः शिक्षाविषये समर्थनसूचकः आसीत्।अतः कापि कापि ऩारी शिक्षाज्योतिप्रकाशेन उद्भासिता अभवत्, यथा विश्ववारा, लोपामुद्रा, गार्गी, अपाला, घोषा, घोधा, मैत्रेयी.....।पानिन्यष्टाध्ययामस्ति आचार्या उपाध्याया शव्दस्य वुतपत्तौ अध्यापयति इति नारीऋषिकायाः उल्लेखमस्ति, काशिकाभाष्ये काशकृष्णाय़ाः आपशलायाः नाम आप्यते, मीमांसाव्यकरणेदृश्यते अम्भृणऋषेः दुहिता वाक्, गार्गी, मैत्रेयी शाश्वती एताषां नारीणां उल्लेखं अपि आप्नुमःवयम्।वृहदारण्यकोपनिषदिउल्लेखमपि अस्ति, विदुषिकन्यां आप्तुं लव्धुं वा, पितुः मातुः पूजानुष्ठानस्य कथा। वैदिकमन्त्रद्रष्टानारीऋषेः नामोल्लेखं अपिअस्ति वेदे च तेन कारनेन तासां

उपनयनविधि पुरुषस्य इव अवश्यकत्तव्यरूपेण परिगनितमभवत्। उपयऩयनसंस्कारेण संस्कृता रमण्यः व्रह्मगायत्रीमन्त्रोच्चारणस्य अधिकारं आप्नुवन्ति च वेदोध्ययने अधिकारीनि भवन्ति, अपि च अग्न्याधानं अग्नौ आहूतिप्रदानस्य अधिकारीनि भवन्ति।एवंविधा शिक्षिता ज्ञानी नारीऋषयः दार्शनिकसभायां अशंग्रहनं कर्त्तु अशक्नोत्। व्रह्मवादिनीगार्गी एवंविधा प्रथितयशा नारीऋषिः आसीत्। मिथिलानृपजनकस्य राजसभायां वहुज्ञानीजनमण्डितसभाकक्षे सा व्रह्मज्ञयाज्ञवल्केन सह व्रह्मविद्याविषयवितर्केव्यपृता आसीत्। यद्यपि वितर्के परस्पर परस्परं पराजितकर्त्तुं न अशक्नोत्। द्वयमपि पारदर्शी इति आख्याताभवत्। अपि च वृहदारण्यके वयं याज्ञवल्कस्य व्रह्मजिज्ञासु कलत्र मैत्रेय्यः उल्लेखं आप्नुमः या पार्थिवसम्पद् न इप्सते केवलं अमृतत्त्वं स्पृहयति स्म। "ये नाहं नामृता स्यां किमहं तेन कुर्याम्" वृहदारण्यकोपनिषदः।

न केवलं शिक्षा अपि च विविधललितकलाविध्यायां नारीणां विशेषज्ञानमासीत् नृत्यगीतप्रभृतिविषयेषु नारीपुरुषाणां नामोल्लेखमस्ति, तथापि नारी एतेषु विषयेषु शिक्षाग्रहनं अकरोत्। शतपथव्राह्मणे उल्लेखमस्ति, पशमव्यवहार नारी अकरोत्। वस्त्रालंकारकर्मणि अपि निष्नातासीत् वैदिकयुगस्य नार्यः१२/ ७/ २/११ शतपथव्राह्मऩम्---

गोष्टिवद्धसमाजविभज्य़ कुलवद्दसमाजे प्रवर्त्तितं अभवत् शनैः शनैः।क्षुद्रपरिवारे आसीत् पुरुषप्रधानः।पुरुषस्य वहुपत्नि आसीत् तु आसीत् भार्यायाःएकपतिः।ऐतरेय व्राह्मणम् ३ / ५/ ३ / ४७।पुरुषस्य गणिकालयं प्रति गमनमासीत् प्रचलितम् पुरुषस्य उपपत्निग्रहनं गणिकासम्भोगं समाजे निषिद्धं नासीत्। नारीऩां क्षेत्रो तु उपपतिग्रहनं महापातककर्मरूपे परिगनितमभवत्।पुत्राय वधूवरस्य मिलनमभवत्, पुत्रलाभार्थं हि च वंशधारारक्षितुं वहुभार्याग्रहणप्रथाप्रचलितमासीत् समाजे। कन्या सम्प्रदानकाले मातामहपितामहस्य उल्लेखमस्ति मातामहीपितामह्याः उल्लेखं कुत्रापि नास्ति।पिता माता सर्वे पृथिव्यामागच्छति मातामहीपितामहीमवलम्व्य तथापि तासां नामोल्लेखं नास्ति। विवाहे कन्याविषये प़श्नकाम्यवस्तु – धनं रूपं, विद्या वुद्धिः वंशम् च।एतेषां विद्ययाःवुद्धेःकापि उपयोगिता अस्ति न वा अस्मिन् विषये वितर्कं अस्ति- मानवगृह्यसूत्रम्१/७६]

स्त्रियः मूलप्रयोजनम् सा अपत्यानां जननी च तस्याः प्रथमं प्रधानं कर्त्तव्यं पुत्रसन्तानं उतपादनम् -आपस्तम्भधर्मसूत्रम् १/१0-५१-५३]अपत्यरहितावधूं दशसमा अनन्तरं, कन्यासन्तानस्यजननीं द्वादशसमा अनन्तरं मृतवतसां पञ्चादशसमा अनन्तरं त्यागकरणं अनायासेन अभवत्, वौधायनधर्मसूत्रम् २/४/६] यस्याः पुत्रसन्तानं नास्ति तं त्यागस्य प्रथा अति प्रचीना।शतपथव्राह्मणे अस्ति-"या वा अपुत्रा पत्नी सा परिवृत्ती"।विवाहात् परं यदि पुत्रसन्तानं न भवति तर्हि पतिः पुऩर्विवाह कर्त्तुं अशक्नोत्, वशिष्टधर्मसूत्रम् २८/२-३]। आपस्तम्भः अवदत् स्त्रीपरित्यागकारीस्वामीनःदण्डविधानमवश्यमेवकर्त्तव्यम् आपस्तम्भः अपि अवदत्- पत्नीं प्रति कुवचनप्रयोगे स्वामीनःदिवसमेकं उपवासं कर्त्तव्यम्।कुमारीकन्यायाः पिता सम्यक् काले यदि कन्यासम्प्रदानं कर्त्तुं न समर्थं भवति तर्हि कन्या स्वेच्छाविवाहकर्त्तुं शक्ष्यति।वशिष्टधर्मसूत्रे अस्ति

"पिता रक्षति कौमारे भर्ता रक्षति यौवने।

रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति"।।

वैदिकयुदस्य प्रथमपर्वस्य अन्ते शिक्षास्थाने अपि नारीणां अधिकारः नासीत् उपनयने अपि तस्याः अधिकारः नासीत्।


**Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026**

जन्मावधि सर्वसंस्कारं नारीनां आसीत् अमन्त्रकम्।मन्त्रोच्चारने हव्यदाने च परवर्त्ती वैदिकयुदस्य नारीनां अधिकारः नासीत्। सगीतं हस्तनिर्मितद्रव्यनिर्मानेपारदर्शिता गृहकर्मणिनिष्नाता श्वशुरकुले सर्वगृहकर्मणि पारङ्गमता आसीत् तस्याःश्रेष्ठकर्म।पुत्रस्य जननीरूपे तस्याः सर्वापेक्षा सम्मानमासीत् न तु कन्यासन्तानस्य जननीरूपे। शिक्षितपुरुषस्य शिक्षितनारीनां सान्निध्यं लव्धुं इच्छारासीत् तस्य इच्छासम्पूर्णपूरणमभवत् गन्निकालये, यतःगन्निकाः आसीत् शिक्षिता केवलम्।अतः सा हि आसीत् स्वाधीना केवलम्।कुलवधूं शिक्षाज्योतिप्रभावात् वञ्चित कृत्वा गणिकाणां राष्ट्रव्यये शिक्षितं कृत्वा कुलनारीं प्रति अविचारमूलककार्यमकरोत् राष्ट्रः। र्आदिवैदिकसमाजे नारीऋषिणां नामोल्लेखं अपि श्रुयते

वैदिकयुगस्यनारीविश्ववारा- वैदिकयुगे या नार्यःनारीऋषिः इति आख्यातवती आसन्. तासां व्रह्मवादिनीविश्ववारा आसीत् प्रधाना।तस्याःमनोहराकवित्वपूर्णामन्त्राःआसीत् अतिमञ्जुला।

विश्ववारा अत्रिमुनेःगोत्रे जातवती।अतः सा अत्रिगोत्रजा विश्ववाराऋषिः इतिख्यातासीत् ऋग्देदसंहितायाः पञ्चममण्डलस्य अष्टाविंशसूक्तस्य सा मन्त्रद्रष्टाऋषिः आसीत्।अस्मिन् सूक्ते षट्ऋक् आसन्। व्रह्मवादिनीविश्ववारा देवानां स्तवोच्चारेण ऋत्विकस्य कार्यसम्पादनमकोरत्। सा देवाणां स्तवंकुर्व्वती यज्ञाय होमकुन्डं प्रति गच्छति

“समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया विभाति।

एति प्राची विश्ववारानमोभिर्देवा ईळाना हविषा घृताची”।।

[ऋग्वेदःमण्डलम् 5, सूक्तम् 28 मन्त्रः1]

सा तृतीयऋचा अनेकानिधनसमृद्धिं प्राप्तुं च दाम्पत्यजीवनं सुशृङ्खलमयं कर्त्तुं अग्निदेवं निकषा प्रार्थनामकरोत्।

“अग्ने शर्ध महते सौभगाय तव द्युन्मान्युत्तमानि सन्तु।

सं जास्पत्यं सुयममा कृणुष्व शत्रुयतामभि तिष्टा महांसि”।।

[ऋग्वेदःमण्डलम् 5, सूक्तम् 28 मन्त्रः3]

तस्याः रचितऋचःअतीवमधुरा प्राञ्जला। तस्याः ऋचा सा अग्निदेवमुद्दिश्यउक्तवती -अग्ने भवान् अस्माकं वहव ऐश्वर्यं प्रदानं करोतु।त्वं अस्माकं जहि रिपुं।अस्माकं पतिपत्नोः दाम्पत्यप्रेमं सुदृटं कुरु। तव आशीर्वादेनअस्माकं विच्छेदं नभवति।अहं तव दीप्तेः स्तवं करोमि।यजमानानां उद्दिश्यं विश्ववारा अवदत्, दव्यवादकअग्नौ हव्यदानं कुरुअग्नेः सेवां कुरु देवान् निकषा हव्यवहनकारी अग्निदेवं वरणं कुरु।पञ्चमन्त्रेण विश्ववारा अग्निदेवं प्रति प्राथनां चकार यत् देवान् उद्दिश्य कृतं यज्ञं अग्निदेवः सम्पन्नं करोतु इति, यतः अग्निदेवःएव हव्यवाहकः।

“समिद्ध अग्न आहुत देवान्यक्षि स्वध्वर।

त्वं हि हव्यवाळसि।।

[ऋग्वेदःमण्डलम् 5, सूक्तम् 28 मन्त्रः”5]

वैदिकयुगस्यनारीअपाला- वैदिकयुगस्य एकानारी अपाला विश्ववारावत् अत्रिवंशे जातवती अत्रिपुत्रीव्रह्मवादिनी अपालायाःजीवनं अतिदुःखमयमासीत्।त्वकरोगाक्रान्तः सा अभवत्, अतः तस्याः पतिः तां तत्याज। पतिपरित्यक्ता अपाला पितुः आश्रमेतपस्यति स्म।इन्द्रदेवःसोमपाने अत्युसाही इति ज्ञात्वा सा इन्द्रदेवं सोमपानं कारयति स्म।अतः इन्द्रदेवः तां वरप्रार्थयितुं अभणत्। तदा अपाला अपि वरप्रार्थनामकरोत्, इन्ददेवस्य वरेण सा त्वकरोगात् मुक्तमभवत्। इन्द्रदेवःसोमपाने अत्युसाही इति ज्ञात्वा एकदा नद्यास्तटे ऐत।तत्र स्नानं कृत्वा, यदा प्रत्यावर्त्तनं अकरेत् तदा पथि सोमं आस्वाअदः सोमं सा स्वयमेव पानं चकार। इन्ददेवस्य वरेण तस्याः पितुःअनुर्वर शष्यक्षेत्रं उर्वरमभवत् च तस्याः पितुः केशशून्यं मस्तकं


Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026

केशपूर्णमभवत्।अपालायाः पितृभक्ति अतुलनीया ऋग्देदसंहितायाः अष्टममण्डलस्य ९१सूक्तस्य अष्टऋक् सा अपश्यत्, अतः सा ऋग्देदसंहितायाः अष्टममण्डलस्य ९१सूक्तस्य मन्त्रद्रष्टानारीऋषि।

व्रह्मवादिनीघोषा- सा आसीत् काक्षीवानऋषेःकन्या।घोषा कुष्ठरोगाक्रान्तासीत् अतः सा अनूडासीत्।तत्पश्चात् स्वर्गस्य देवाश्विनीकुमारद्वयं तां रोगमुक्तमकरोत्।तदनन्तरं सा पतिलाभं चकार।

"युवं नरा स्तुवते कृष्णियायं विष्णण्व ददथुर्विष्वकाय।

घोषायै चित्पितृषदे दुरोणे पतिं जुर्यन्त्या अश्विनावदत्तम्।।[ऋग्वेद 1.117.7]

ऋग्वेदस्य दशममण्डलस्य ऊनचत्वारिंशत् च चत्वारिंशत् सूक्तद्वयस्य सा सङ्कलयिता।घोषा अनवद्या, घोषा अश्विनीकुमारद्वयं सम्मोधनं कृत्वा प्राह -भवतोःसर्वत्रगमनाय रथ अस्ति, वयं अहर्निशि तस्य रथस्य नाम करोमि, यथा पिता इति नाम्ना आह्लादं जायते तथा भवतोः नाम्ना आह्लादं जायते, अस्माकं माधूर्यसम्पन्नवाक्यवदितुं प्रवृत्तं कुरुतां अस्माकं कर्म सुसम्पन्नं कुर्व्वाताम्।यज्ञे सोमरसः यथा आह्लादसम्मनं तथा अस्माकं जनान् निकषा आह्लादसम्मनं कुर्व्वाताम्।अस्मान् अतुलधनं यच्छतु।एका कन्या तस्याः पित्रालयेअनूटा स्थित्वा वृद्धावस्था प्राप्ताऽभवत्।

"जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात्।

प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम्"।।[ऋग्वेद 1.116.10]

वेदे स्त्रीणां अवस्था अतिहीनावस्था इति प्रदर्शयितुं मन्त्रः अस्ति भवतोः तस्याः पति आनयनं कुर्व्वाथाम्।भवतोः कृपागुणेन च्यवनऋषिः पुनःयौवनवस्थाप्राप्तमभवत्।भवतोः विस्मयेन अभिभूतं कार्यं जनानं अग्रेप्रकाशितं करोमि।भवतोः अति निष्णातचिकीतषकः। भवतोःआतपत्रशीतलच्छायायां आश्रयलाभकर्त्तुं भवतोः स्तवं करोमि।पिता पुत्रं यथा शिक्षां ददाति तथामा शिक्षां यच्छतु।अश्विनीकुमारद्वयं योद्धानारीविश्पलां लोहनिर्मितपदंसृष्ट्वा दत्तवन्तौ, यतः सा नारी समरे तस्याःपदयुगलनश्यति।

चरित्रं हि वेरिवाच्छेदि पर्णमाजाखेलस्य परितक्म्ययाम्।

सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम्।।ऋग्वेदः1.116.15

व्रह्मवादिनीगार्गी- वचक्नुऋषेः पूण्यतपोवने यथा शिय्याःव्रह्मविद्याज्ञानार्जनमकुर्वन् तथा वचक्नुऋषेःतनया वाचक्लवी अपि विद्यार्थिजनेन सह विद्यालाभमकरोत्। इयं वाचक्लवी गार्गी इति नाम्ना ख्याता।पुराकालस्य आर्यनारीषु गार्गीइति नाम अनन्तसमास्मरणीयावरणीयारूपे तिष्ठति जगति।आसीत् सा वेदे वेदान्ते उपनिषदि अनन्तज्ञानवती।ऋषयः

तां व्रह्मवादिनी उपाधिः दत्तवन्तः।सा ज्ञानवानयाज्ञवल्केन सह शाश्त्रविषयवितर्कसभायां स्वस्य ज्ञानार्जनस्य परिचयं ज्ञापयति स्म।वृहदारण्यकोपनिषदि तृतीयाध्यायस्य षष्टव्राह्मणे गार्गी याज्ञवल्कस्य संलापात् तस्याः असाधारणपाण्डित्यस्य परिचयं परिस्फुटितं भवति।पुरा राजर्षिजनकःशाश्त्रज्ञानपर्यालोचना कर्त्तु तस्य राजसभायां वहवपण्डितनरनारीणां आह्वयति स्म।अस्मिन् वितर्कसभायां गुणीजनाःवहूनिविर्तकस्य प्रश्नोत्तरेण समाधानं चक्रुः। वितर्कान्ते ते सर्वे पण्डिताः अभिनन्दिता अभवन् नृपेन जनकेन।

नारीऋषिलोपामुद्रा वैदिकयुगस्य आसीत् एकश्रेष्ठऋषिःअगस्थ।

तस्य पाण्डित्यं पुराणेऽपि प्रशिद्धम्।देवता च असुराणां समरे देवाःअगस्थऋषेः शरणापन्नमभवत् तदा अगस्थऋषिःअर्णवजलं पीत्वा असुरवधे देवानां सहयतामकोरत।एकदा ऋषिःपति चलन् अपश्यत् एकस्य विवरस्य अभ्यन्तरे कति जनाः अवस्थानं कुर्वन्ति। सः तान् अपृच्छत्- भवन्तःकेनप्रकारेण ईदृशावस्थापन्नं

भवन्ति।तेःउत्तरं ददौ वयं तव पूर्वपुरुषः, त्वमद्यावधि अकृतदारोऽसि अतः वयमिदृशावस्थापन्नं अस्मि।त्वं विवाहं कुरु तव पुत्रःअस्माकं दुःखं दूरं करिश्यति।विवाहकर्त्तुं व्याकुलऋषिः कुत्रापि तस्ययोग्य कन्या न प्राप्तवान्। अतः निरुपायऋषिः स्वयं हि


Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026

एका कन्यां असृजत्।सा कन्या भवति अतुलनीया। सा कन्या विदर्भराज्ञः गृहे कन्यारूपे जातवती। राजा तस्याःनाम दत्तवान् लोपामुद्रा।ऋषिःअगस्थः विदर्भराजानं समीपे लोपामुद्रायाःपाणिग्रहनेच्छा प्रकाशितमकरोत्।तदा राज्ञः इच्छया लोपामुद्रया सह अगस्थऋषेःविवाहमभवत्। लोपामुद्रा आदर्शनारीचरित्रासीत्।ऋग्वेदस्य प्रथममण्डलस्य 179 सूक्तस्य प्रथम द्वितीय च ऋचौ लोपामुद्रा संङ्कलनमकरोत्।

नारीऋषिशश्वती-प्लयोगः इति नृपस्य पुत्रःअसङ्ग शापग्रस्तं भूत्वा विकलाङ्गमभवत्।असङ्गस्य पत्नी आसीत् शश्वती। महर्षेः अङ्गिरायाः कन्या शश्वती आसीत्, वेदादिशास्त्रे तस्याः ज्ञानमासीत् अन्तहीनम्।पतिप्राणा शशत्वीअतीव तपस्यां कृत्वा पति रोगमुक्तकर्त्तुं अश्कनोत्। ऋग्वेदस्यअष्टममण्डलस्य प्रथमसूक्तस्य चतुत्रिशतमन्त्रं शशत्वी ददर्श।अनेन मन्त्रेण सा तस्याः पत्युः स्तवं कृतवती तस्याः पतिं रोगमुक्तं कर्त्तुं तपस्यां कृतवती तस्यः कठोरसाधनाय तस्याः पतिः रोगमुक्तंमभवत्।

“अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः।

शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं विभर्षि “।।

**[ऋग्वेदःमण्डलम् 8, सूक्तम् 1, मन्त्रः 34]**

शश्वतीन केवलं पतिव्रतानारी आसीत् अपि च वेदे च विविधशास्त्रेषु अनन्योत्युकृष्टज्ञानमासीत्

नारीऋषिइन्द्रानी -वैदिकसमये पुरुषाःअनेकास्त्रीग्रहणं कर्त्तुं अशक्नोत्।काक्षीवान् इति ऋषिः अध्ययनान्ते गृहं त्याक्ता पथिपार्श्वे निन्द्रां अगच्छत्।तदा कश्चित् राजा तस्मात् स्थानात् गच्छन् ऋषिं पश्य तं रूपवानं दृष्ट्वा तं ऋषिं स्वगृहं नीत्वा नृपस्य दशदुहितां तस्मैः प्रददे। वैदिकयुगे वहुविवाहप्रथा आसीत् तु वैदिकनार्यःसदा प्रार्थनामकरोत् तेषां जीवने सपत्नी न भवति, ते सर्वाः देवान् निकषा ज्ञपयति स्म तेषां जीवने सपत्नी निवारणविषये।इन्द्रानी ऋक्वेदस्य दशममण्डलस्य 145 मन्त्रसंकोलनमकरोत्। सपत्नीणां उपरि आधिपत्यस्थापनाय अस्य मन्त्रस्य संकोलनं कृतं नारीऋषिना”इमा खनाम्योषधिं वीव्रुधां वलवत्तमाम्।

यया सपत्नीं वाधते यया संविन्दते पतिम्”।।

{ऋग्वेदः दशममण्डलम्, सूक्तम्145, मन्त्र 1 }

सूक्तरचनाकालेवहुविवाह समाजे प्रचलनमासीत् इदं वोध्यते। मन्त्रणां सपत्नीं निवारणविषये यथार्थं उल्लेखमस्ति।ते मन्त्राः आसन् स्वतस्फुर्ता स्वगुणेनगुणाण्विता, मन्त्रे उल्लिक्षितमासीत्, तीव्रशक्तियुक्ता लताःऔषधि सपत्यीं क्लेशोतपादनाय, पतिप्रणयलाभाय, औषधि तेजसम्पन्ना, औषधेयं पति वशीकरणायसपत्नीदूरीकरणाय।अयं तेजसम्नन्नमन्त्रप्रयोगेन सपत्नीदूरं भवतु। अस्मिन् सूक्तेषट् मन्त्राः सन्ति।

**उपसंहारम् :** पुरुषप्रधानसमाज तथापि वैदिकसमाजे नारीणां विशेषस्थानमासन् अपि च वहुलाशें तत् स्थानं अन्धकाराच्छन्नाभवति, तथापि इति उच्यते गार्गी, मैत्रेयी, अपाला लोपामुद्रा ये ये नारीणां कथा वयं विद्मः ते ते स्वमहिमायां अत्युज्वलाः नक्षत्राः स्वरूपाः ते व्यतिक्रमा इति सत्यं ते सदा युगात् युगान्तरं समाजं अग्रे वहन्ति।

**References-**


- Badass Women Live: by Their Own rules- Kindly Edition
- Prachin Bharat samaj o sahitya-Sukumari Bhattacharya
- Women’s Rights Vedes- dharmadebaBdhyamartanda
- वैदिक नारी -Dr Ramnath Bedalankar,




**Vivekananda Guidance & Counselling Educational Trust All rights reserved. ©2026**